परिधय: पालाशकाष्ठका: खादिरौडुम्बरबिल्व-रोहितकविकङ्कतानां ये वा यज्ञिया वृक्षा आर्द्रा: शुष्कसलत्वका: ॥" इति ॥ * ॥ )

भूगोलादेर्वेष्टनम् । यथा,—

"व्यासेभनन्दाग्निहते विभक्ते
खबाणसूर्यै: परिधिस्तु सूक्ष्म: ॥"
इति लीलावती ॥

( क्ली, परिधीयते यदिति । परि + धा + कर्म्मणि कि: । परिधेयवस्त्रम् । यथा, भागवते । ८ । ७ । १७ ।

"मेघश्याम: कनकपरिधि: कर्णविद्योतविद्यु-न्मूर्ध्नि भ्राजद्विलुलितकच: स्रग्धरो रक्तनेत्र: ॥"
"कनकं सुवर्णमिव पीतं परिधि वस्त्रं यस्य" इति तट्टीका ॥ )

परिधिस्थ:, पुं, ( परिधौ तिष्ठतीति । परिधि + स्था + क: । ) परिचर: । इत्यमर: ।२ ।८।६२ ॥ युद्धकाले परप्रहारात् रथरक्षक: । प्रजानामन्त्यवस्थापनकारिणीति केचित् । सेनायां राज्ञो दण्डनायक: । इत्यन्ये । इति भरत: ॥

परिधेयं, त्रि, ( परिधातुं शक्यम् । परि + धा + "अचो यत् ।" ३ । १ । ९७ । इति यत् "ईद्यति ।" ६ । ४ । ६५ । इति आत ईत् ततो गुण: । ) परिधानीयम् । परिधातव्यम् । परिधानोपयुक्तवस्त्रादि । यथा,—

"न तु स्वभोग्यतयापि प्राप्ते परिधेयादौ स्मृतेरदृष्टार्थत्वापत्ते: ।" इति विवादचिन्तामणि: ॥

परिपणं, क्ली, ( परिपण्यते व्यवह्रियतेऽनेन । परि + पण् + "पुंसि संज्ञायां घ: प्रायेण ।" ३ । ३ । ११८ । इति घ: । ) मूलधनम् । इत्यमर: । २ । ९ । ८० । पुँजि इति भाषा ॥

परिपन्थक:, पुं, ( परिपन्थयति दोषादिकं प्राप्नोतीति । परि + पथि क गतौ + ण्वुल् । ) शत्रु: । इति हेमचन्द्र: । ३ । ३९३ ॥ ( यथा, महाभारते । १० । १६ । ३१ ।

"इतो दुर्य्योधन: पापो राज्यस्य परिपन्थक:॥")

परिपन्थी, [ न् ] त्रि, ( परिसर्व्वतो भावेन दोषाख्यानं पन्थयितुं शीलमस्य । परि + पन्थ + णिनि: । ) शत्रु: । इत्यमर: । २ । ८ । ११ । ( यथा, गीतायाम् । ३ । ३४ ।

"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥"

प्रतिकूलाचारी । यथाह कश्चित् ।

"अपराधिनि चेत् क्रोध: क्रोधे क्रोध: कथं नहि ।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि ॥")

परिपाक:, पुं, ( परिपच्यते इति । परि + पच् + घञ् ।) परिपक्वता । यथा, भावप्रकाशे ।

"इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्य: परिपाकमेति ।"

नैपुण्यम् । यथा,—

"वीक्ष्य तस्य विनये परिपाकं
पाकशासनपदं स्पृशतोऽपि ।"
इति नैषधपञ्चमसर्ग: ॥

परिपाकिनी, स्त्री, ( परिपाक: परिपाकशक्तिर्विद्यतेऽस्या: । परिपाक + इनि + ङीप् । ) त्रिवृता । इति शब्दचन्द्रिका ॥

परिपाटि:, स्त्री, ( परिपाटनम् । परि + पट् + स्वार्थे णिच् + अच इ: । यद्वा परि भागे भागेन पाटि: पाटनं गतिर्यस्याम् ।) पारिपाट्यविशिष्ट: । तत्पर्य्याय: । आनुपूर्व्वी २ आवृत् ३ अनुक्रम: ४ पर्य्याय: ५ । इत्यमर: ।२।७। ३७ ॥ आनुपूर्व्वम् ६ परिपाटी ७ । इति भरत: ॥ आनुपूर्व्यम् ८ आनुपूर्व्यकम् ९ । इति टीकान्तरम् ॥ क्रम: १० । इति जटाधरशब्दरत्नावल्यौ ॥

परिपिष्टकं, क्ली, ( परि + पिष् + क्त + संज्ञायां कन् । ) सीसकम् । इति राजनिर्घण्ट: ॥

परिपुष्करा, स्त्री, ( परित: पुष्करं सुखं यस्या: ।) गोडुम्बा । इति शब्दचन्द्रिका ॥ राजगोमक् इति भाषा ॥

परिपूतं, क्ली, ( परि + पू + क्त: । ) अपास्ततुषधान्यम् । यथा, मनु: ।

"परिपूतेषु धान्येषु शाकमूलफलेषु च ।
निरन्वये शतं दण्ड: सान्वयेऽर्द्धशतं दम: ॥"

त्रि, सर्व्वतोभावेन पवित्रम् ॥ (यथा,माघे ।२।१६ ।

"घूर्णयन् मदिरास्वादमदपाटलितद्युती ।
रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ ॥" )

परिपूर्णता, स्त्री, ( परिपूर्णस्य भाव: । परिपूर्ण + "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति तल् तत: "त्वान्तं क्लीवन्तलन्तं स्त्रियाम् ।" इति वार्त्तिकोक्तत्वात् स्त्रियां टाप् । ) परिपूर्णत्वम् । सम्पूर्णता । तत्पर्य्याय: । आभोग:२ । इत्यमर: । २ । ६ । १२७ ॥

परिपूर्णत्वं, क्ली, ( परिपूर्णस्य भाव: । "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति त्व । तत: क्लीवत्वम् ।) परिपूर्णता । सम्पूर्णत्वम् । इति जटाधर: ॥ ( यथा,—

"इच्छति परिपूर्णत्वं सुखचन्द्रस्य ते सखि ! ।
न जाने कथकोरं हि विधाता पालयिष्यति ॥"
इत्युद्भट: ॥ )

परिपेलं, क्ली, ( परिपेलति म्रदुतां गच्छतीति । पेल गतौ + अच् । ) परिपेलवम् । कैवर्त्तीमुस्तकम् । इति शब्दमाला ॥ तन्त्रान्तरे यथा,—

"परिपेलं प्लवं वन्यं तत्कुटन्नटसंज्ञकम् ।
जायते मुस्तकाकारं शैवालकुलसञ्चये ॥"
इत्यमरटीकायां भरत: ॥

परिपेलवं, क्ली, (परि सर्व्वत: पेलवं म्रदुता यस्य ।) कैवर्त्तीमुस्तकम् । इत्यमर: । २ । ४ । १३१ ॥ (अत्यन्तकोमले, त्रि । यथा, बृहत्संहितायाम् । ६४ । ८ ।

"स्फीतमध्यपरिपेलवं फलं
श्रीष्ममध्यचिरकालसम्भवम् ॥"

गुणादयोऽस्य कैवर्त्तीमुस्तकशब्दे ज्ञया: ॥)

परिप्लवं, त्रि, ( परिप्लवते इति । प्लु + अच् । ) चञ्चलम् । इत्यमर: । ३ । १ । ३५ ।

( यथा, माघे । १४ । ६८ ।

"मतकुम्भाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुष: ।
गच्छत: स्म मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नतां क्षयम् ॥"

पुं, राज्ञ: सुखीनलस्य पुत्त्र: । यथा, भागवते । ९ । २२ । ४२ ।

"सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनल: ।
परिप्लव: सुतस्तस्मान्मेधावी सुनयात्मज: ॥" )

परिप्लुत:, त्रि, ( परिप्लु + क्त: । ) जलादिप्लावित: । यथा, मार्कण्डेये देवीमाहात्म्ये १ अध्याय: ॥

"आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता ॥"

परिप्लुता, स्त्री, ( परि + प्लु + क्त: । स्त्रियां टाप् । ) मदिरा । इति हेमचन्द्र: । ३ । ५६६ ॥ ग्राम्यधर्म्मे (मैथुने) वेदनावती योनि: । यथा,—

"परिप्लुतायां भवति ग्राम्यधर्म्मे रुजा भृशम् ।"
इति योनिव्यापन्निदाने माधवकर: ॥

("पित्तलाया नृसंवासे क्षवथूद्गारधारणात् ।
पित्तसंमूर्च्छितो वायुर्योनिं दूषयति स्त्रिया: ॥
शूनास्पर्शाक्षमासार्त्तिर्नीलपीतमसृक् स्रवेत् ।
श्रोणीवंक्षणपृष्ठार्त्तिज्वरार्त्ताया: परिप्लुता ॥"
इति चरके चिकित्सास्थाने त्रिंशेऽध्याये ॥)

आप्लुते त्रि ॥

परिबर्ह:, पुं, ( परिबर्ह्यतेऽनेन । बर्ह प्राधान्ये + घञ् । ) परिच्छद: । हस्त्यश्वव्यजनकम्बलादि । नृपार्हार्थ: । राजयोग्यद्रव्यं सितच्छत्रादि । नृपार्हं सितच्छत्रादि अर्थो धनमिति केचित् । इत्यमरभरतौ ॥ (यथा,—

"निवेश्य गङ्गामनु तां महानदीं
चमूं विधानै: परिबर्हशोभिनीम् ।
उवास रामस्य तदा महात्मनो
विचिन्तमानो भरतो निवर्त्तनम् ॥"
इति रामायणे । २ । ८३ । २६ । )

परिभव:, पुं, ( परि + भू + अप् । ) अनादर: । इत्यमर: ।१।७।२२ ॥ (यथा, रघु: ।१२।३७।

"फलमस्योपहासस्य सद्य: प्राप्स्यसि पश्य माम् ।
मृग्या: परिभवो व्याघ्रामित्यवेहि त्वया कृतम् ॥")

परिभाव:, पुं, (परि + भू + "परौ भुवोऽवज्ञाने ।" ३ । ३ । ५५ । इति घञ् ।) परिभव: । इत्यमर: । १ । ७ । २२ ॥

परिभाषणं, क्ली, ( परि + भाष् + ल्युट् । ) सनिन्द उपालम्भ: । इत्यमर: ।१ । ६ । १४॥ उपालम्भो दुर्व्वाद: । निन्दया सह वर्त्तमानो य उपालम्भस्तत्र सनिन्दे परिभाषणम् । उपालम्भो गुणाविष्करणेन स्तुतिपूर्व्वकोऽपि भवति । यथा महाकुलस्य भवत: किमिदमुचितं भवति । अत्र तु सस्तुतौ न परिभाषणम् । टीकान्तरेऽपि बन्धुलस्य तवागम्यागमनं योग्यमिति निन्दापूर्व्व: । महाकुलस्य तव कथं विप्रवध: । इति स्तुतिपूर्व्वक उपालम्भ: । इति भरत: ॥*॥ नियम: । इति मेदिनी ॥ आलाप: । इति विश्व: ॥